## ।। अथ द्वादशोऽध्याय : ।। Chapter-12

वसिष्ठ उवाच :- गौतमं ते पुरस्कृत्य नानागोत्रा द्विजातय: ।।
ईजिरे विविधैर्यागै: समाप्तवरदक्षिणै: ।। १

उदीच्यां दिशि गोवाटान् गौतमाश्रमसंन्निधौ ।।
शतशश्चक्रिरे विप्रा: प्रदत्तानां श्रिया गवां ।। २

केतकीस्रवणाज्जाता स्त्रावंती नाम सा नदी ।।
तस्यां पिबंति सततं गावो राजन् घटस्त्रवा: ।। ३

प्रत्यूषे ब्रह्मघोषेण देवशंखस्वनेन च ।।
गवां हुंकारशब्देन वत्सानां वासितेन च ।।
श्रीमालमभवम्द्रूप सबाह्याभ्यंतरं शुचि ।। ४

मणि मौक्तिक-सोपानै: प्रवालमयजालकै: ।
हेमदीप्तानि हर्म्याणि द्विजानां रेजिरे भृशम् ।। ५

होमशालासहस्त्राणि रम्याणि शुचिमंति च।।
हविर्गंधैर्दिशां भागान् सुरभीन् चक्रिरे भृशम् ।। ६

---

ई बी १ दी, ई बी १ इतिरे, ई -२- उदीच्यांदिशियोवाटान,
ई हेमदीप्तानिहर्म्याणिपा द्विजा, ३ ई भवम्द्रूय: सवाह्य ।

श्लोक

( ए१) दिप्तानि

(ए २) सुरभि

ए १ बी १
धर्मशास्त्राण्यनूच्यंते सरहस्यानि सर्वतः ।।
बी २
सहोपनिषदो वेदाः छंदोव्याकरणानि च ।। ७

बी ३
परस्परं प्रीयमाणा द्विजवर्याः सुमेधसः ।।
कृते श्रीमालमासाद्य विप्रेन्द्राः सोदरा इव ।। ८

यद्यदिच्छंति मनसा तत्तत् सिध्यंति तत्क्षणात् ।।
स्वयं श्रीर्वरदा नित्यं तेभ्यः साधयतीप्सितम् ।। ६

श्रीमालमनुयातानामतिथीनां वनांतरात् ।।
समूहैरावृता मार्गा हंसैः पद्माकरा इव ।। १०

बी ४
गृहे गृहे ह्यतिथयः प्रीता यांति यथेप्सितम् ।।
ई १
प्रशंसंतो द्विजाग्र्याणां सत्क्रिया विधिवत्कृताः ।। ११
ई २ बी ५
स्वयं भूमिश्च धान्यानि काले सूते वसुंधरा ।।
काले वर्षंति पर्जन्यो यावदिच्छंति वै द्विजाः ।। १२

---

ई बी १ मुच्यंते, ई बी २ सहोसनेपनिषाषो, ई बी ३ वर्णाः, ई बी ४- प्रीतयांतिथ्यंसितं, ई बी ५ वसुधरा, ई-१ ता, २ ई स्वंयभूनिवधान्यानिकाले

( ए १) नु
(ए २ ) ततत्सिध्यंति त्क्षणात्

ई १
भूषितं सौधमालाभि: श्रीमालं शुशुभे भुवि ।।
बी १
शरत्काले सिताभोदवृंदैरिव नमस्तलम् ।। १३

न रोगो न मन:पीडा दौस्थ्यं च न भयं क्वचित् ।।
न लोभो न च मात्सर्यं श्रीमाले क्वचिदीक्ष्यते ।। १४

हव्यै: प्रीता: सुरश्रेष्ठा: कव्यैश्च पितरो नृप ।।
ए १
दानैरतिथयोऽत्यर्थमु तदा श्रीमालवासिनाम् ।। १५

ए२
दिवि देवा नरा भूमौ पन्नगाश्च रसातले ।।
स्पृहां श्रीमालवासस्य सदा कुर्वंति भूमिप ।। १६

बी ३ए ३
भुंक्जतेवांछितान् भोगान्नमंति च हरिप्रियां ।।
ई२
भवेभवे भवेमास्म द्विजा: श्रीमालवासिन: ।। १७

त्र्यंबकस्य सरसो गौतमीयस्य चाभित: ।।
तटे यूपांकिता भाति हर्म्याद्रिमांचितेव भू: ।। १८

-०-

ई बी १ शताभोद, बी-२ नृप:, बी ३- भुजतेवांबिता, १ ई सौधमालाभिश्रीमाल, ई-२ भवेभवे भयेमश्चेत् विजा:
ए भूंजंते
(ए १) योत्यर्थेसु
(ए२) भूमौ
(ए३) भूंजंते
(ए४) भवेमास्म

अथ क्रमेण तत्रासन् दैवतीर्थानिभूरिशः ।।
सागृकोटिश्च तीर्थानां तत्र जल्पंति सूरयः ।। १९

देवाश्च मुनयः सिद्धा पुण्याः सर्वेज्लाशयाः ।
पंचानाल्लुपंचाशत् सहस्त्राणि द्विजन्मनाम् ।। २०
अष्टादश शाला न्यास्वं गोपुराणां तत्र भूपते ।
अष्टादश तथा दुर्गा नव बाला नवांतरे ।। २१

ब्रह्मशालासहस्त्राणि चत्वारि तद्विधा मठाः ।।
पण्यविक्रयशालानामष्टसाहस्त्रिकं नृप ।। २२
समाकोटिषु सन्नद्धा कृतिमन्मतवारणाः ।।
आसन् सार्ग्री सहस्त्रं च सभ्यानामुपवेशितुम् ।। २३
साप्तभौमिकसौधानां लक्षमेकं महौजसाम् ।।
तथा षष्टिसहस्त्राणि चतुःषष्ट्यधिकानि च ।। २४

----

ई बी १ माग्र, ई बी २ ब्राह्ये, ई बी ३- आसनसतससहस्त्रं ,
ई बी ४ वेशिनां, ई बी ५- सप्त, ई बी -६- सुप्तानां, ई बी-७-
चतुषाष्टचधिकानिच, - १ ई - समास्काटिकसत्रधावुति

---

(ए-१) तीर्थाणि
(ए-२) तीर्थाणां
(ए-३) महौजसां
(ए-४) षष्टि

धन्या: श्रीमालमासाद्य तीर्थयात्रां व्रजंति ये[बी१] ।।
अनुक्रमेण भूपाल ते सुरा न तु मानुषा: ।। २५

येऽपि शृण्वंति माहात्म्यं श्रीमालस्य नरोत्तमा[बी२]: ।।
तीर्थयात्राकृतं पुण्यं तेषां भवति[ई२] निश्चितम् ।। २६

-०-

इति श्री स्कंदपुराणे एकाशीति साहस्र्यां संहितायां ब्राह्मय विभागे तृतीय परिच्छेदे श्रीमाल महात्म्ये श्रीमाल प्रशंसा नाम द्वादशोऽध्याय: ।। १२ ।।

-०-

ई बी १ तसंतिये

ई बी २ तम:

१ ई धन्याश्रीमाल

२ ई भवे